# Natya Shastra Chapter 33

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ 33

## Document Information

Text title : naaTyashaastra adhyaaya 33

File name : natya33.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : hareshbakshi at hotmail.com

Proofread by : hareshbakshi at hotmail.com

Latest update : february 18, 2003

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ 33

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ત્રયસ્ત્રિંશોઽધ્યાયઃ ।

ગુણાત્ પ્રવર્તતે ગાનં દોષં ચૈવ નિરસ્યતે ।
તસ્માદ્યત્નેન વિજ્ઞેયૌ ગુણદોષૌ સમાસતઃ ॥ ૧ ॥

ગાતા પ્રત્યગ્રવયાઃ સ્નિગ્ધો મધુરસ્વરોપચિતકણ્ઠઃ ।
લયતાલકલાપાતપ્રમાણયોગેષુ તત્ત્વજ્ઞઃ ॥ ૨ ॥

રૂપગુણકાન્તિયુક્તા માધુર્યોપેતસત્વસમ્પન્નાઃ ।
પેશલમધુરસ્નિગ્ધાનુનાદિસમરક્ત ગુરુ (શુભ) કણ્ઠાઃ ॥ ૩
સુવિહિતગમકવિધાયિન્યોઽક્ષોભ્યો(ભ્યાસ્)તાલલયકુશલાઃ ।
આતોદ્યાર્પિતકરણા વિજ્ઞેયા ગાયિકાઃ શ્યામાઃ ॥ ૪ ॥

પ્રાયેણ તુ સ્વભાવાત્ સ્ત્રીણાં ગાનં નૃણાં ચ પાઠ્યવિધિઃ ।
સ્ત્રીણાં સ્વભાવમધુરઃ કણ્ઠો નૃણાં બલિત્વં ચ ॥ ૫ ॥

યત્ર સ્ત્રીણાં પાઠ્યાત્(ઠ્યં) ગુણૈર્નરાણાં ચ ગાનમધુરત્વમ્ ।
જ્ઞેયોઽલઙ્કારોઽસૌ ન હિ સ્વભાવો હ્યયં તેષામ્ ॥ ૬ ॥

સુનિવિષ્ટપાણિલયયતિયોગજ્ઞૌસુમધુરલઘુહસ્તૌ ।
ગાતૃગુણૈશ્ચોપેતાવવહિતમનસૌ સુસઙ્ગીતૌ ॥ ૭ ॥

સ્ફુટરચિતચિત્રકરણૌ ગીતશ્રવણાચલૌપ્રવીણૌ ચ ।
ચિત્રાદિવાદ્યકુશલૌવીણાભ્યાં વાદકૌ ભવતઃ ॥ ૮ ॥

બલવાનવહિતબુદ્ધિર્ગીતલયજ્ઞસ્તથાસુસઙ્ગીતઃ ।
શ્રાવકમધુરસ્નિગ્ધો દૃઢપાણિર્વંશવાદકો જ્ઞેયઃ ॥ ૯ ॥

અવિચલિતમવિચ્છન્નં વર્ણાલઙ્કારબોધકંમધુરમ્ ।

સ્નિગ્ધં દોષવિહીનં વેણોરેવં સ્મૃતં વાદ્યમ્ ॥ ૧૦ ॥

જ્ઞાનવિજ્ઞાનકરણવચનપ્રયોગસિદ્ધિનિષ્પાદનાનિ
 ષડાચાર્યગુણા ઇતિ ।
તત્ર જ્ઞાનં શાસ્ત્રાવબોધઃ । યથા ચ
ક્રિયાસમ્પાદનં વિજ્ઞાનમ્ । કણ્ઠહસ્તગૌણ્યં કરણમ્ ।
જિતગ્રન્થતા વચનમ્ । દેશાદિસમ્પદારાધનં પ્રયોગસિદ્ધિઃ ।
શિષ્યસ્વભાવમવિશેષ્યોપાત્તય
ઉપદેશાચ્છિષ્યનિષ્પાદનમિતિ ॥ ૧૧ ॥

શ્રાવણોઽથ ઘનઃ સ્નિગ્ધો મધુરોહ્યવધાનવાન્ ।
ત્રિસ્થાનશોભીત્યેવં તુ ષટ્ કણ્ઠસ્ય ગુણા મતાઃ ॥ ૧૨ ॥

ઉદાત્તં શ્રૂયતે યસ્માત્તસ્માચ્છ્રાવણ ઉચ્યતે ।
શ્રાવણઃ સુસ્વરો યસ્માદચ્છિન્નઃ સ ઘનો મતઃ ॥ ૧૩ ॥

અરૂક્ષધ્વનિસંયુક્તઃ સ્નિગ્ધસ્તજ્ જ્ઞૈઃ પ્રકીર્તિતઃ ।
મનઃપ્રહ્લાદનકરઃ સ વૈ મધુર ઉચ્યતે ॥ ૧૪ ॥

સ્વરેઽધિકે ચ હીને ચ હ્યવિરક્તો વિધાનવાન્ ।
શિરઃકણ્ઠેષ્વભિહિતંત્રિસ્થાનમધુરસ્વરઃ ।
ત્રિસ્થાનશોભીત્યેવં તુ સ હિ તજ્જ્ઞૈરુદાહૃતઃ ॥ ૧૫ ॥

કપિલો હ્યવસ્થિતશ્ચૈવ તથા સન્દષ્ટ એવ ચ ।
કાકી ચ તુમ્બકી ચૈવ પઞ્ચ દોષા ભવન્તિ હિ ॥ ૧૬ ॥

વૈસ્વર્યં ચ ભવેદ્યત્ર તથા સ્યાદ્ ઘર્ઘરાયિતમ્ ।
કપિલઃ સ તુ વિજ્ઞેયઃ શ્લેષ્મકણ્ઠસ્તથૈવ ચ ॥ ૧૭ ॥

ઊનતાઽધિકતા ચાપિ સ્વરાણાં યત્ર દૃશ્યતે ।
રૂક્ષદોષહતશ્ચૈવ જ્ઞેયઃ સ ત્વવ્યવસ્થિતઃ ॥ ૧૮ ॥

દણ્ડપ્રયોગાત્ સન્દષ્ટસ્ત્વાચાર્યૈઃ પરિકીર્તિતઃ ।
યો ન વિસ્તરતિ સ્થાને સ્વરમુચ્ચારણાગતમ્ ॥ ૧૯ ॥

નાસાગ્રગ્રસ્તશબ્દસ્તુતુમ્બકી સોઽભિધીયતે ॥ ૨૦ ॥

અન્યે તુ
સમપ્રહરણે ચૈવ જવિનૌ વિશદૌ તથા ।

જિતશ્રમૌ વિકૃષ્ટૌ ચ મધુરૌ સ્વેદવર્જિતૌ ।
તથા બૃયન્નખૌ ચૈવ જ્ઞેયૌ હસ્તસ્ય વૈ ગુણાઃ ॥ ૨૧ ॥  ઇતિ
એતે ગુણાશ્ચ દોષાશ્ચ તત્ત્વતઃ કથિતો મયા ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ હ્યવનદ્ધવિધિં પુનઃ ॥ ૨૨ ॥

પૂર્વં યદુક્તં પ્રપિતામહેન ।
કુર્યાત્ ય એવં તુ નરઃ પ્રયોગે
સમ્માનમગ્ર્યં લભતે સ લોકે ॥ ૨૩ ॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે ગુણદોષવિચારો
નામાધ્યાયસ્ત્રયસ્ત્રિંશઃ ॥ ૩૩ ॥

Encoded by Haresh BakShi hareshbakShi@hotmail.com

*Natya Shastra Chapter 33*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*